एषा स्यादरतिः स्थायीभावा भक्तिरसो भवेत् ॥”
इति भक्तिरसामृतसिन्धुः ॥

भक्तिलः, पुं, (भक्तिं भङ्गीं लातीति । ला + कः ।) साधुघोटकः । यथा,—
प्रभुभक्ता भक्तिलाश्च कुलीनेषु कुलोत्कटाः ।
इति शब्दचन्द्रिका ॥

भक्तिदातरि त्रि ॥

भक्ष क भक्षे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) क भक्षयति । इति दुर्गादासः ॥

भक्ष ञ भक्षणे । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ० सक०-सेट् ।) ञ भक्षति भक्षते । इति दुर्गादासः ॥

भक्षकः, त्रि, (भक्षयतीति । भक्ष + “ण्वुल्तृचौ ।” ३ । १ । १३३ । इति ण्वुल् ।) खादकः । भक्षणपरः । तत्पर्य्यायः । घस्मरः २ अद्मरः ३ । इत्यमरः ।३।१।२०॥ (यथा, हितोपदेशे ।१।६३५।
“भक्ष्यभक्षकयोः प्रीतिर्विपत्तेः कारणं महत् ।
शृगालात् पाशबद्धोऽसौ मृगः काकेन
रक्षितः ॥”)

भक्षटकः, पुं, (भक्ष + अटन् । ततः संज्ञायां कन् ।) क्षुद्रगोक्षुरकः । इति राजनिर्घण्टः ॥

भक्षणं, क्ली, (भक्ष + भावे ल्युट् ।) द्रवेतरद्रव्यगलाधःकरणम् । तत्पर्य्यायः । न्यादः २ खदनम् ३ खादनम् ४ अशनम् ५ निघसः ६ वल्भनम् ७ अभ्यवहारः ८ जग्धिः ९ जक्षणं १० लेहः ११ प्रत्यवसानम् १२ घसिः १३ आहारः १४ प्सानम् १५ अवलाणम् १६ विप्साणम् १७ भोजनम् १८ जेमनम् १९ अदनम् २० । इति हेमचन्द्रः ॥ द्रव्यविशेषस्य भक्षणनिषेधो यथा, कर्म्मलोचने ।
“शणशाकं हयामांसं करेणु मथितं दधि ।
तर्ज्जन्या दन्तधावञ्च सद्यो गोमांसभक्षणम् ॥”

भक्षणीयं, त्रि, (भक्ष + अनीयर्) भक्ष्यद्रव्यम् । भक्षणयोग्यम् । इति भक्षधातोः कर्म्मण्यनीयप्रत्ययेन निष्पन्नम् । इति व्याकरणम् ॥ (यथा, पञ्चतन्त्रे । ४ । २५ । “तन्न भेतव्यम् । त्वद्वचनेन भक्षणीयास्ते दायादाः ।”) तत्स्थापनविधिर्यथा, पाकराजेश्वरे ।
“पुरस्ताद्विमलं पात्रं सुविस्तीर्णं मनोरमम् ।
तत्र भक्तं परिण्यस्तं मध्यभागे सुसंयुतम् ॥
सूपं सर्पिः पलं शाकं पिष्टमन्नन्तु मत्स्यकम् ।
स्थापयेद्दक्षिणे पार्श्वे भुञ्जानस्य यथाक्रमम् ॥
प्रवेहाद्याः द्रवाः सर्व्वे पानीयं पानकं पयः ।
चोष्यं सन्धानकं लेह्यं सव्यपार्श्वे निधापयेत् ॥
सर्व्वान् इक्षुविकारांश्च पक्वान्नं पायसं दधि ।
पुरतः स्थापयेद्धीमान् द्वयोः पंक्त्योश्च मध्यतः ॥”

भक्ष(क्ष्य)पत्रा, स्त्री, (भक्षं वा भक्ष्यं भक्षणीयं पत्रमस्याः ।) नागवल्ली । इति राजनिर्घण्टः ॥ (गुणादिविवृतिरस्या नागवल्लीशब्दे ज्ञातव्या ॥)

भक्षितं, त्रि, (भक्ष्यते स्मेति । भक्ष + कर्म्मणि क्तः ।) कृतभक्षणवस्तु । (यथा, हितोपदेशे ।१।
“भक्षितेनापि भवता नाहारो मम पुष्कलः ॥”) तत्पर्य्यायः । चर्व्वितम् २ लिप्तम् ३ प्रत्यवसितम् ४ गिलितम् ५ खादितम् ६ प्सातम् ७ अभ्यवहृतम् ८ अन्नम् ९ जग्धम् १० ग्रस्तम् ११ ग्लस्तम् १२ अशितम् १३ भुक्तम् १४ । इत्यमरः ।३।२।११०॥ जक्षितम् १५ । इति शब्दरत्नावली ॥

भक्ष्यं, त्रि, (भक्ष्यते इति । भक्ष + ण्यत् ।) भक्षितव्यम् । भक्षणीयम् । यथा । ‘प्रतिपदि कुष्माण्डं न भक्ष्यम् । दशम्यां कलम्बी न भक्ष्या ।’ इति स्मृतिसर्व्वस्वम् ॥ अपि च, हितोपदेशे ।
“मासमेकं नरो याति द्वौ मासौ मृगशूकरौ ।
अहिरेकदिनं याति अद्य भक्ष्यो धनुर्गुणः ॥”
(भक्ष्यद्रव्याणि तेषां गुणादिकञ्च यथा,—
“वक्ष्याम्यतःपरं भक्ष्यान् रसवीर्य्यविपाकतः ।
भक्ष्याः क्षीरकृतावल्या वृष्या हृद्याः सुगन्धिनः ॥
अदाहिनः पुष्टिकराः दीपनाः पित्तनाशनाः ।
तेषां प्राणकरा हृद्या घृतपूराः कफावहाः ।
वातपित्तहरा वृष्या गुरवो रक्तमांसलाः ॥
बृंहणा गौड़िकाभक्ष्या गुरवोऽनिलनाशनाः ।
अदाहिनः पित्तहराः शुक्रलाः कफवर्द्धनाः ॥
मधुमस्तकसंयावाः पूपा ह्येते विशेषतः ।
गुरवो बृंहणाश्चैव मोदकास्तु सुदुर्ज्जराः ॥
रोचनो दीपनः स्वर्य्यः पित्तघ्नः पवनापहः ।
गुरुर्वृष्यतमश्चैव षट्कः प्राणवर्द्धनः ॥
हृद्यः सुगन्धिर्मधुरः स्निग्धः कफकरो गुरुः ।
वातापहस्तृप्तिकरो बल्यो विष्यन्दनः स्मृतः ॥
बृंहणा वातपित्तघ्ना भक्ष्या बल्यास्तु सामिताः ।
हृद्याः पथ्यतमास्तेषां लघवः फेनकादयः ॥
मुद्गादिवेशवाराणां पूर्णा विष्टम्भिनो मताः ।
वेसवारैः सपिशितैः सम्पूर्णा गुरुबृंहणाः ॥
पाललाः श्लेष्मजननाः शष्कुल्यः कफपित्तलाः ।
वीर्य्योष्णाः पैष्टिका भक्ष्याः कफपित्तप्रकोपणाः ॥
विदाहिनो नातिबला गुरवश्च विशेषतः ।
वैदला लघवो भक्ष्याः कषायाश्चैवमारुताः ॥
विष्टम्भिनः पित्तसमाः श्लेष्मघ्ना भिन्नवर्च्चसः ।
बल्या वृष्यास्तु गुरवो विज्ञेया माषसाधिताः ॥
कूर्च्चिका विसृता भक्ष्या गुरवो नातिपित्तलाः ।
विरूढ़कृतता भक्ष्या गुरवोऽनिलपित्तलाः ॥
विदाहोत्क्लेशजनना रूक्षा दृष्टिप्रदूषणाः ।
हृद्याः सुगन्धिनो वृष्या लघवो घृतपाचिताः ॥
वातपित्तहराबल्या वर्णदृष्टिप्रसादनाः ।
विदाहिनस्तैलकृता गुरवः कटुपाकिनः ॥
उष्णा मारुतदृष्टिघ्नाः पित्तलास्त्वक्प्रदूषणाः ।
फलमांसेक्षुविकृतितिलमाषोपसंस्कृताः ॥
भक्ष्या बल्यास्तु गुरवो बृंहणा हृदयप्रियाः ।
कपालाङ्गारपक्वास्तु लघवो वातकोपनाः ॥
सुपक्वास्तनवश्चापि भूयिष्ठं लघवो मताः ।
सकिलाटादयो भक्ष्या गुरवः कफवर्द्धनाः ॥”
“आप्तान्वितमसंकीर्णं शुचिकार्य्यं महानसम् ॥
तत्राप्तैर्गुणसम्पन्नमन्नं भक्ष्यं सुसंस्कृतम् ।
शुचौ देशे सुसंगुप्तं समुपस्थापयेद्भिषक् ॥”
“घृतं कार्ष्णायसे देयं पेया देया तु राजते ॥
फलानि सर्व्वभक्ष्यांश्च प्रदद्याद्वैदलेषु च ।
परिशुष्कप्रदिग्धानि सौवर्णेषु प्रकल्पयेत् ॥
प्रद्रवाणि रसांश्चैव राजतेषूपहारयेत् ।
कट्वराणि खड़ांश्चैव सर्व्वान् शैलेषु दापयेत् ॥
काचस्फटिकपात्रेषु शीतलेषु शुभेषु च ।
दद्याद्वैदूर्य्यपात्रेषु रागषाड़वसट्टकान् ॥
पुरस्ताद्विमले पात्रे सुविस्तीर्णे मनोरमे ।
सूदः सूपौदनं दद्यात् प्रदेहांश्च सुसंस्कृतान् ॥
फलानि सर्व्वभक्ष्यांश्च परिशुष्काणि यानि च ।
तानि दक्षिणपार्श्वे तु भुञ्जानस्योपकल्पयेत् ॥
प्रद्रवाणि रसांश्चैव पानीयं पानकं पयः ।
खड़ान् यूषांश्च पेयांश्च सव्ये पार्श्वे प्रदापयेत् ॥
सर्व्वान् गुड़विकारांश्च रागषाड़वसट्टकान् ।
पुरस्तात् स्थापयेत् प्राज्ञो द्वयोरपि च मध्यतः ॥
एवं विज्ञाय मतिमान् भोजनस्योपकल्पनाम् ।”
इति सुश्रुते सूत्रस्थाने ४६ अध्यायः ॥)

भक्ष्यकारः, त्रि, (भक्ष्यं भक्ष्यद्रव्यं करोतीति । कृ + “कर्म्मण्यण् ।” ३ । २ । १ । इति अण् ।) पिष्टकविक्रयजीवी । पिष्टकशिल्पी । इतिभरतः ॥ तत्पर्य्यायः । आपूपिकः २ कान्दविकः ३ । इत्यमरः । २।९।२८॥ पूपिकः ४ पूपविक्रयी ५ मोदकादिविक्रयी ६ । इति शब्दरत्नावली ॥

भक्ष्याभक्ष्यं, क्ली, (भक्ष्यमभक्ष्यञ्च ।) खाद्याखाद्यद्रव्यम् । यथा,—
“भक्ष्याभक्ष्याण्यनेकानि ब्राह्मणस्य विशेषतः ।
अत्र शिष्टा यथा ब्रूयुस्तथा कार्य्यविनिर्णयः ॥”
इत्येकादशीतत्त्वे शङ्खवचनम् ॥ * ॥
नारद उवाच ।
“भक्ष्यं किंवाप्यभक्ष्यञ्च द्विजानां गृहिणां प्रभो ! ।
यतीनां वैष्णवानाञ्च विधवाब्रह्मचारिणाम् ॥
किं कर्त्तव्यमकर्त्तव्यमभोग्यं भोग्यमेव च ।
सर्व्वं कथय सर्व्वज्ञ ! सर्व्वेश ! सर्व्वकारण ! ॥”
श्रीमहेश्वर उवाच ।
“कश्चित्तपस्वी विप्रश्च निराहारी चिरं मुनिः ।
कश्चित् समीरणाहारी फलाहारी च कश्चन ॥
अन्नाहारी यथा लोके गृही च गृहिणीयुतः ।
येषामिच्छा च या ब्रह्मन् ! रुचीनां विविधा गतिः ॥
हविष्यान्नं ब्राह्मणानां प्रशस्तं गृहिणां सदा ।
नारायणोच्छिष्टमिष्टमनिवेद्यमभक्ष्यकम् ॥
अन्नं विष्ठा जलं मूत्रं यद्विष्णोरनिवेदनम् ।
विण्मूत्रं सर्व्वपापोक्तमन्नञ्च हरिवासरे ॥
ब्राह्मणः कामतोऽन्नञ्च यो भुङ्क्ते हरिवासरे ।
त्रैलोक्यजनितं पापं सोऽपि भुङ्क्ते न संशयः ॥
न भोक्तव्यं न भोक्तव्यं न भोक्तव्यञ्च नारद ! ।
गृहिभिर्ब्राह्मणैरन्नं संप्राप्ते हरिवासरे ॥
गृही शैवश्च शाक्तश्च ब्राह्मणो ज्ञानदुर्बलः ।
प्रयाति कालसूत्रञ्च भुक्त्वा च हरिवासरे ॥
कृमिभिः शालमानैश्च भक्षितस्तत्र तिष्ठति ।
विण्मूत्रभक्षणं कृत्वा यावदिन्द्राश्चतुर्द्दश ॥
जन्माष्टमीदिने रामनवमीदिवसे हरेः ।
शिवरात्रौ च यो भुङ्क्ते सोऽपि द्विगुणपातकी ।